शास्त्री-II खण्ड साहित्य

रघुवंश महाकाव्यम्
त्रयोदशः सर्गः

Saathi

Date __/__/__

प्र० (1)- वेलानिलाय प्रसृता भुजङ्गा महोर्मि विस्फूर्जथुनिर्विशेषाः। सूर्यांशुसम्पर्कसमृद्धरागैर्व्यज्यन्त एते मणिभिः फणस्थैः॥

उत्तरम् - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य त्रयोदश सर्गात् उद्धृतोऽस्ति। अस्मिन् श्लोके श्रीरामः सीतां प्रति कथयति-

व्याख्याः- वेलानिलाय = समुद्र तीरवायुं पातुम्। प्रसृता = निर्गताः। महोर्मि विस्फूर्जथुनिर्विशेषाः = विशाल तरङ्गैकभेद - रहिताः। एते = इमे। भुजङ्गाः = सर्पाः। सूर्यांशु सम्पर्क समृद्ध रागैः = रविरश्मि सम्बन्धाद्विवृद्धकान्तिभिः। फणस्थैः = फणावर्तमानैः। मणिभिः = रत्नैः। व्यज्यन्ते = ज्ञायन्ते, प्रतीयन्ते।

भावार्थः- समुद्रतटे पवनं पातुं जलान्निर्गता विशालतरङ्गाकारा एते सर्पाः स्वशिरोगतैः रविरश्मिसम्पर्कादधिकं चमत्कुर्वद्भिः मणिभिः एते सर्पा एव सन्ति। न तरङ्गा इति प्रतीयन्ते, इति भावः।

Renu Devi
28/09/20
राधा उमाकान्त सं० महावि० सुरखसेना
पूर्णिया।

उपशास्त्री-खण्ड साहित्य तृतीय-पत्रम्
रघुवंश-महाकाव्यम्
द्वितीयः-सर्गः

Date __/__/____

प्र०(1)- कण्डूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथिता त्वगस्य ।
अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः ॥

उत्तरम् - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास विरचितस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति।
अस्मिन् श्लोके सिंहः राजा दिलीपं प्रति कथयति

व्याख्याः - कदाचित् = कस्मिन्श्चित् काले, कटं = स्वकपोलम्, कण्डूयमानेन = घर्षयता, वन्यद्विपेन = आरण्यककरिणा, अस्य = शिवगौरीप्रियस्य देवदारोः, त्वक् = वल्कलम्, उन्मथिता = उत्पाटिता, अथ = अनन्तरम्, अद्रेः तनया = पर्वतराजपुत्री पार्वती, असुरास्त्रैः = दानवायुधैः, आलीढं = क्षतम्, सेनान्यं = स्कन्दनामानं स्वपुत्रम्, इव = यथा, एनं = देवदारुम्, शुशोच = चिन्तयामास ।

Renu Devi
28/09/20
राधा उमाकान्त सं० महावि० सुरखसेना,
पूर्णिया ।

Page No. ____

शास्त्री - I खण्ड साहित्य

अभिज्ञानशाकुन्तलम्

Saathi

Date ___/___/___

प्र०(1) - अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम् ।
बद्धमिव स्वैरगतिर्जनमिह सुखसङ्गिनमवैमि ॥

उत्तरम् प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास विरचितस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य पञ्चमोऽङ्कात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके शारद्वतोऽपि एवानुभव वर्णयन्नाह -
अहमपि = भवानिवाहं शारद्वतोऽपि इह = नगरे सुखसङ्गिनं = विषयभोगासक्तं जनं = लोकम् स्नातः = कृतस्नानः अभ्यक्तं = तैलमर्दनेन सम्पादित देहमलम्, तैलाभ्यमशुचिमिव अस्नातमिव, शुद्धः = अन्तःशुद्धः, पवित्रः अशुचिम् = कलुषात्मानं, पापिनमिव, प्रबुद्धः = ज्ञाततत्त्वावबोधः, मोहनिद्राप्राप्तमिव जागरितः सुप्तमिव = निद्रितमिव, स्वैरगतिः = स्वेच्छाचारी बद्धं = निगडित यन्त्रितम् अवैमि = प्रतीये ।

अयं भावः - सखे शार्ङ्गरव! भवान् जनाकुलमिदं नगरं पावकव्याप्तं गृहमिव जानासि, अहमप्यस्मिन्नगरे विषयासक्त जनं यथा कृताभिषेको नरः कृततैलमर्दनं पुरुषं स्वापेक्षया मलिनं सम्भावयति, अन्तःशुद्धो जनः पापिनमिव एतन्नगरमिव दूरनिवासयोग्यम् मन्यते । तस्मादेतादृशं नगरमस्मादृशां सर्वथा निवासनिर्हम् ।

अत्र मालोपमालङ्कारश्छन्दश्चास्ति शिखरिणी ॥

Renu Devi
28/09/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

उपशास्त्री-प्रथमखण्ड साहित्य तृतीय-पत्रम्
रघुवंश- द्वितीयः सर्गः

Date ___/___/___

प्र०(4)-प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वभङ्गे वितथप्रयत्नः।
जडीकृतत्र्यम्बकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपाणिः ॥

उत्तरम्-प्रसंगः—प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति।

व्याख्याः— अस्मिन् श्लोके राजा दिलीपः सिंहं प्रति कथयति- हे मृगराज! वाण प्रयोगे राज्ञो दिलीपस्य सर्वप्रथमोऽयं पराभवोऽजनि। इन्द्रस्यापि पूर्वमीदृश एव पराजयो जात आसीत्। एवञ्च व्यर्थप्रयासो दिलीपः सिंहस्य समायोचितं प्रत्युत्तरं ददौ।

त्रिपुरदाहावसरे पार्वतीक्रोडस्थिते बालस्वरूपिणि शिवे वज्रं मोक्तुमिच्छन्निन्द्रस्तद्विलोकनात् कुण्ठितबाहुर्बभूवेति महाभारतीया कथाऽत्रानुसंधेया
बाहुं सवज्रं शक्रस्य क्रुद्धस्यास्तम्भयत् प्रभुः।

Renu Devi
28/09/20

रघ्घा उमाकान्त सं० महावि० सुरवसेना,
पूर्णिया।

Page No.